M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 229

Title: Surya Stuti

229

Surya Stuti	Title
	Author
	Editor
	Year, Vols.
	Publisher
229	Remarks

श्रीगणेशाय नमः ॥ श्री गुरुभ्यो नमः ॥ शृणुष्वावहितो राजन्
शुचिर्भूत्वा समाहितः ॥ क्षणं च कुरुराजेंद्र संप्रवक्ष्यामि शेषतः
१ ॥१॥ धौम्येन तु यथा पूर्वं पार्थाय सुमहात्मने ॥ नामाष्टशतमाख्यात
तच्छृणुष्व महामते ॥२॥ धौम्य उवाच ॥ सूर्योर्यमा भगस्त्वष्टा पूषार्कः सवि
तारविः ॥३॥ गभस्तिमानजः कालो मृत्युर्धाता प्रभाकरः ॥ पृथिव्यापश्च
तेजश्च खं वायुश्च परायणं ॥४॥ सोमो बृहस्पतिः शुक्रो बुधोंगारक
एव च ॥ इंद्रो विवस्वान् दीप्तांशुः शुचिः शौरिः शनैश्चरः ॥ ब्रह्माविष्
णुश्च रुद्रश्च स्कंदो वैश्रवणो यमः ॥ वैद्युतो जाठरश्चाग्निरैंधनस्तेज १
सांपतिः ॥६॥ धर्मध्वजो वेदकर्ता वेदांगो वेदवाहनः ॥ कृतं त्रेता द्वाप

रश्च कलिः सर्वमलाश्रयः ॥७॥ कला काष्ठा मुहूर्ताश्च क्षपा मासास्तथा क्ष
णाः ॥ संवत्सरकरोश्वत्थ कालचक्रो विभावसुः ॥ पुरुषः शाश्वतो यो
गी व्यक्ताव्यक्तः सनातनः ॥ कालाध्यक्षः प्रजाध्यक्षो विश्वकर्मा तमोनु
दः ॥९॥ वरुणः सागरोंशश्च जीमूतो जीवनोरिहा ॥ भूताश्रयो भूतपतिः स
र्वभूतनमस्कृतः ॥१०॥ स्रष्टा संवर्तको वह्निः सर्वस्यादिरलोलुपः ॥ अनंतः
कपिलो भानुः कामदः सर्वतोमुखः ॥११॥ जयो विशालो वरदः सर्व
धातुरलोलुपः ॥ मनः सुपर्णो भूतादिः शीघ्रगः प्राणधारणः ॥१२॥
धन्वंतरिर्धूमकेतुरादिदेवो दितेः सुतः ॥ द्वादशात्मा रविंदाक्षः पी

सूर्य त्वंमातात्वंपितामतः॥१३॥स्वर्गद्वारंप्रजाद्वारंमोक्षद्वारंत्रिविष्टपं॥दे
हकर्ताप्रशांतात्माविश्वात्माविश्वतोमुखः॥१४॥चराचरात्मा
सूक्ष्मात्मामैत्रेयःकरुणान्वितः॥एतद्वैकीर्त्तनीयस्यसूर्यस्यामि
२ ततेजसः॥१५॥नामाष्टशतकंचेदंप्रोक्तमेतत्स्वयंभुवा॥सुरगण
पितृयक्षसेवितंह्यसुरनिशाचरसिद्धवंदितं॥वरकनकहुताश
नप्रभंप्रणिपतितोस्मिहितायभास्करं॥सूर्योदयेयःसुसमाहि २
तःपठेत्सपुत्रदारान्धनरत्नसंचयान्॥१७॥लभेतजातिस्मरतां
नरःसदाधृतिंचमेधांचविंदतेपुमान्॥इमंस्तवंदेववरस्ययोनरः
प्रकीर्त्तयेत्शुचिःसुमनाःसमाहितः॥१८॥विमुच्यतेशोकदवा

ग्निसागराल्लभेतकामान्मनसोयथेप्सितान्॥ वैशंपायन ॥एव
मुक्तःसधौम्येनतत्कालसदृशंवचः॥१७॥विप्रत्यागसमाधि
स्थःसंयतात्मादृढव्रतः॥धर्मराजोविशुद्धात्मातपआतिष्ठदुत्तमं॥२०॥
पुष्पोपहारैर्बलिभिरर्चयित्वादिवाकरं॥सोवगाह्यजलंराजा
देवस्याभिमुखोभवत्॥२१॥योगमास्थायधर्मात्मावायुभ
क्षोजितेंद्रियः॥गांगेयंवार्युपस्पृश्यप्राणायामेनतस्थिवान्॥
२२॥शुचिःप्रयतवाग्भूत्वास्तोत्रमारब्धवांस्ततः॥युधिष्ठिरः॥
त्वंभानोजगतश्चक्षुस्त्वमात्मासर्वदेहिनां॥२३॥त्वंयोनिःस
र्वभूतानांत्वमाचारःक्रियावतां॥त्वंगतिःसर्वसांख्यानांयो

सूर्यः गिनां त्वं परायणं ॥२४॥ अनन्तावर्त्त गाकद्वारं त्वं यतीनां मुमुक्षतां
॥ त्वया संधार्यते लोकस्त्वया लोकप्रकास्यते ॥२५॥ त्वया पवित्रे
क्रियते नित्यं संपाल्यते त्वया ॥ त्वामुपस्थाय काले तु ब्राह्मणा
३ वेदपारगाः ॥२६॥ स्वशाखाविहितैर्मन्त्रैरर्चन्ति ऋषिगणार्चितं ॥
तव दिव्यं रथं यान्तं अनुयांतिश्ववराधिनः ॥२७॥ सिद्धचारणगंध
र्वयक्षगुह्यकपन्नगाः ॥ त्रयस्त्रिंशच्च ये देवास्तथा वैमानि
कगणाः ॥२८॥ सोपेन्द्राः समहेन्द्रा स्तुत्वा त्वामिष्ट्वा सिद्धिमागताः ॥ ३
उपयान्त्यर्चयित्वा तु त्वां वै प्राप्तमनोरथाः ॥२९॥ दिव्यमंदा
रमालाभिस्तूर्णं विद्याधरोत्तमाः ॥ गुह्याः पितृगणाः सदा

ये दिव्ये चमा तुष्टा ॥३०॥ ते पूज्य त्वयित्वा त्वामेव गच्छंत्याशु प्रधा
नतां ॥ वसवो मरुतो रुद्रा ये च साध्या मरीचयः ॥३१॥ वालखि
ल्यादयः सिद्धाः श्रेष्ठत्वं प्राणिनां गताः ॥ ब्रह्मलोके षु लोके
षु सप्तस्वप्यखिलेषु च ॥३२॥ तदद्भुतं महं मन्ये त्वत्तो यदतिरिच्य
ते ॥ संति चान्यानि सत्वानि वीर्यवंति महांति च ॥३३॥ न तु तेषां तथा
दीप्तिः प्रभवो वा यथा तव ॥ ज्योतींषि तव सर्वाणि त्वं सर्वज्यो
तिषां गतिः ॥३४॥ त्वयि सत्यं च सत्त्वं च सर्वे भावाश्च सात्विकाः ॥ त्व
त्तेजसा कृतं चक्रं सुनाभं विश्वकर्मणा ॥३५॥ देवारीणां मदो ये
न नाशितः शार्ङ्गधन्विना ॥ त्वमादाय अंशुभिस्तेजो निदाघे सर्वदे

सू

हितां॥३६॥ सर्वौषधिभिरं रसानां च पुनर्वर्षासु त्वं च सि॥ तंप्रपंत
न्येदहंतन्ये गर्जत्यन्येयथाघना:॥३७॥ निर्घोततेप्रवर्त्तितव
प्रवर्षिरभ्रमय॥ ततथासुरवय। त्यक्ति नप्राबार। तकंबका:॥३८॥
४ रीतिवातार्दिकंलोकेयथातवमरीचय:॥ त्रयोदशाद्वीपपतिगो
भिर्भासियसेमही॥४०॥ त्रयाणामपिलोकानांहितायेक:प्रवर्त्त
से॥ तवयद्यकदयेनस्याद्ध्यजगदिदंभवेत॥४१॥ नचधर्मार्थ श्री
धा कामेषुप्रवर्त्तेरन्मनीषीण:॥ आनंपशुबंधेष्टि मंत्रयज्ञतप: ४
क्रिया:॥४२॥ त्वत्प्रसादादवाप्यंतेब्रह्मक्षत्रविशांगणे:॥ यद
ह्रब्रह्मण:प्रोक्तंसहस्रयुगसंमितं॥४३॥ तस्यत्वमादिरंतश्च

कालज्ञै:परिकीर्त्तित:॥ मन्नूनांमनुपूत्राणांजगतोमानवस्य च॥
४४॥ मन्वंतराणांसर्वेषांमीश्वराणांत्वमीश्वर:॥ संहारकालेसं
प्राप्तेभवक्रोधविनिस्सृत:॥४५॥ संवर्त्तकाग्निरूपेल्लोकंभस्मीक
त्यावतीष्ठते॥ त्वद्दीधीतिसमुत्पन्नाता नावर्णामहाघना:॥४६॥
सैरावतासाशनय:कुर्वत्याभूतसंप्लवं॥ कृत्वाद्वादशधात्मा
नंद्वादशादित्यतांगत:॥ संहत्यैकार्णवंसर्वंत्वंशोषयसिरश्मिभि:
॥४७॥ त्वामिंद्रमाहुर्नत्वंयस्त्वंविष्णुस्त्वंप्रजापति:॥ त्वमाग्निस्त्वं
मन:सूक्ष्मंप्रभुस्त्वंब्रह्मशाश्वत:॥४८॥ त्वंहंस:सविताभानु
रंशुमालीवृषाकपि:॥ विवस्वान्मिहिर:पूषामित्रोधर्मस्तथैवच॥
॥४९॥

स॰अ॰ सहस्ररश्मिरादित्यस्तपनस्त्वंगवांपतिः॥ मार्तंडोर्करविःसूर्यःश
रण्योदिनकृत्तथा॥ दिवाकरःसप्तसप्तिर्धामकेशीविरोच
५ नः॥ आशुगामीतमोघ्नश्च हरिदाश्वश्चकीर्त्यते॥५०॥ सप्तम्या
मथवाषष्ठ्यांभक्त्यापूजांकरोतियः॥ अनिर्विण्णोनहंकारीतंलक्ष्मी
र्भजतेनरं॥५१॥ नतेषामापदःसंतिनाधयोव्याधयस्तथा॥ येत
वानन्यमनसःकुर्वंत्यर्चनवंदनं॥५२॥ सर्वरोगैर्विरहितासर्व गण॰
पापविवर्जिताः॥ त्वद्भावभक्ताःसुखिनोभवंतिचिरजीविनः ५
॥५३॥ त्वंममापन्नकामस्यसर्वातिथ्यंचिकीर्षतः॥ अन्न
मन्नपतेदातुमभितःश्रद्धयार्हसि॥५४॥ येचतेनुचराःसर्वेपा
हि

दोपांतंसमाश्रिताः॥ माठरारुणदंडाद्यास्तांस्तान्वंदेशनिक्षुभान्॥
॥५५॥ क्षुभयासहितामैत्रीयाश्चान्याभूतमातरः॥ ताश्चसर्वा
नमस्यामिपांतुमांशरणागतं॥५६॥ वैशंपायनः॥ ॥एवंस्तुतो
महाराजभास्करोलोकपावनः॥ ततोदिवाकरःप्रीतोदर्शयामा
सपांडवं॥५७॥ दीप्यमानस्ववपुषाज्वलन्निवहुताशनः॥ वी
वस्वानुवाच॥ ॥यत्तेभिलषितंकिंचित्तत्त्वंसर्वमवाप्स्यसि॥५८॥
अहमन्नंप्रदास्यामिसप्तपंचचतेसमाः॥ फलमूलामिषंशाकं
संस्कृतंयन्महानसे॥५९॥ चतुर्विधंतदन्नाद्यमक्षय्यंतेभविष्य
॥ इतश्चतुर्दशेवर्षेभूयोराज्यमवाप्स्यसि॥६०॥ वैशंपायन॥

स्तं॰ सू॰ ५ 229

पूवमुक्त्वा तु भगवांस्तत्रैवांतरधीयत ॥ इमं स्तवं प्रयतमनाः समाधिना पठेदिहा
न्योपि वरं समर्थयन् ॥ ६१ ॥ तत्तस्य दद्याच्च रविर्मनीषितं तदाप्नुयाद्यद्यपि तत्सुदुर्लभं ॥
यश्चेदं धारयेन्नित्यं शृणुयाद्वाप्यभीक्ष्णशः ॥ ६२ ॥ पुत्रार्थी लभते पुत्रं धनार्थी लभते धनं ॥
विद्यार्थी लभते विद्यां पुरुषोप्यथवा स्त्रियः ॥ ६३ ॥ उभे संध्ये पठेन्नित्यं नारी वा पुरु
षो यदि ॥ आपदं प्राप्य मुच्येत बद्धो मुच्येत बंधनात् ॥ ६४ ॥ एतद्ब्रह्मा ददौ पूर्वं शक्रा
य सुमहात्मने ॥ शक्राच्च नारदः प्राप्तो धौम्यस्तु तदनंतरं ॥ ६५ ॥ धौम्याद्युधि
ष्ठिरः प्राप्य सर्वान् कामानवाप्तवान् ॥ संग्रामे च जयेन्नि[illegible]त्यं विपुलं चाप्नु
याद्वसु ॥ ६६ ॥ मुच्यते सर्वपापेभ्यः सूर्यलोकं स गच्छति ॥ ६७ ॥ वैशंपायनः श्री ५
॥ इति श्रीमहाभारते वनपर्वणि काम्यकवने सूर्य अष्टोत्तरशतनामे
सूर्यस्तोत्रं समाप्तं ॥ ॥ छ ॥ श्रीगणपतिर्पर्णमस्तु ॥ ॥